विषय - संस्कृत

कक्षा - नवम

# अभ्यास पत्र

(क)

## खण्डः 'क'

## अपठित-अवबोधनम्

1 - **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत–**

पुरा एकः भूपालः आसीत्। सः यदा-कदा वेषं परिवर्त्य प्रजानां कुशलवृत्तं वेत्तुम् भ्रमति स्म। एकदा रात्रौ सः स्वप्रजाः परीक्षितुम् राजमार्गे एवं विशालं शिलाखण्डम् अस्थापयत्। सूर्ये उदिते जनाः स्व-स्वकार्याय इतस्ततः गच्छन्ति स्म। कस्यचित् वृक्षस्य पृष्ठतः तिरोहितः सः एतत् दृश्यं पश्यति स्म। सजमार्गस्य मध्ये विशालं शिलाखण्डं दृष्ट्वा जनाः गच्छन्ति स्म। तदैव राजा तस्मात् मार्गात् आगच्छतः अनेकान् गणमान्यनागरिकान् अधिकारिणः अमात्यान् च अपश्यत्। परम् एतत् दृष्ट्वा ते सर्वे तु मार्गं परिवर्त्य राजभवनं गतवन्तः। एतत् दृश्यं वीक्ष्य सः व्यथितः अभवत्। तदैव राजा आगच्छतम् एकं श्रमिकम् अपश्यत्। तस्य शिरसि काष्ठानि आसन्। समीपम् एत्य श्रमिकः शिलाखण्डं दृष्टवान्। काष्ठानि अन्यत्र स्थापयित्वा सः तच्छिलाखण्डम् बलेन अन्यत्र अस्थापयत्। तस्मिन्नेव क्षणे नृपः तत्रागच्छत्। तेन श्रमिकेण सह राजभवनम् अगच्छत्। राजसभायां सर्वान् सम्बोधयन् उवाच–"नूनम् अनेन स्वकर्तव्यं कृतम्। अस्य स्थानं तु मम आसनस्य समीपे विद्यते।"

**प्रश्नाः**

**I. एकपदेन उत्तरत–**

(i) राजा केन सह राजभवनम् अगच्छत् ?

(ii) सः कीदृशं शिलाखण्डं मार्गे अस्थापयत् ?

**II. पूर्णवाक्येन उत्तरत–**

(i) शिलाखण्डं दृष्ट्वा जनाः किम् अकुर्वन् ?

(ii) कस्य स्थानं भूपालस्य समीपे स्यात् ?

**III. प्रदत्त-विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–**

(i) सः यदा-कदा वेषं परिवर्त्यः, इत्यत्र सः इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(क) श्रमिकाय (ख) भूपालाय

(ग) नागरिकाय (घ) अमात्याय

(ii) 'गच्छन्ति स्म' इति क्रिया-पदस्य कर्तृपदं किम् ?

(क) मन्त्रिणः (ख) नागरिकाः

(ग) जनाः (घ) अधिकारिणः

(iii) 'भूपालः' इति पदस्य अत्र कं विशेषणं प्रयुक्तम् ?

(क) सः (ख) अयम्

(ग) व्यथितः (घ) एकः

(iv) 'नृपः' इत्यस्य अत्र किं पर्यायपदं प्रयुक्तम् ?

(क) तिरोहितः (ख) व्यथितः

(ग) राजा (घ) सः

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख'

### रचनात्मकं कार्यम्

2 भवती साक्षी। निर्दिष्ट-शब्द-साहाय्येन भ्रातरं प्रति जन्मदिवसस्य अवसरे शुभाशंसापत्रं लिखतु–

(*i*) ________

तिथिः ________

प्रियभ्रातः! (*ii*) ________

सस्नेहं वन्दे।

(*iii*) ________ कुशल-समाचारः पत्रात् ज्ञातः। अहम् अपि (*iv*) ________ अस्मि। अहम् परीक्षायाः कारणात् (*v*) ________ निकषा अगन्तुम् असमर्था। अतः तुभ्यम् अनेन पत्रेण एव (*iv*) ________ प्रेषयामि। आशासे यत् त्वमपि विद्यालये (*vii*) ________ सह जन्मदिवसस्य आनन्दम् अनुभविष्यसि।


(*viii*) ________ मम प्रणामाः। तुभ्यं (*ix*) ________।

तव ज्येष्ठा भगिनी

(*x*) ________

| मञ्जूषा |
|---|
| कुशला, मातृपितृचरणेषु, शुभकामनाम्, मेरठतः, अविनाश, साक्षी, त्वाम्, स्नेहराशिः, स्वमित्रैः, तव |

3 अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि लिखत–



मञ्जूषा

विकसितानि, वृक्षाः, कन्दुकेन, हस्ते, बालकः बालिका, भ्रमन्ति, पुष्पाणि, मार्गे, क्रीडन्ति, पक्षिणः

(अथवा)

मञ्जूषायां प्रदत्त-शब्दानां सहायतया 'मम दिनचर्या' विषयम् अधिकृत्य पञ्च वाक्यानि लिखत।

| मञ्जूषा |
|---|
| भजामि, स्वपिमि, प्रातःकाले, पाठान्, ईश्वरं, भोजनं करोमि, उद्याने, विद्यालयात्, क्रीडामि, सप्तवादने, रात्रौ, पठामि |

## खण्ड: 'ग'
## अनुप्रयुक्त-व्याकरणम्

4- **प्रदत्त-विकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत–**

(*i*) जना: ________ नमन्ति।

(क) विद्वान् (ख) विद्वांसम्

(ग) विद्वांस: (घ) विदुषि

(*ii*) विद्यालये ________ आगच्छतु।

(क) भवान् (ख) भवत:

(ग) भवति (घ) भवन्तु

(*iii*) आत्मना ________ उद्धरेत्।

(क) आत्मन: (ख) आत्मनम्

(ग) आत्मना (घ) आत्मने

(*iv*) राम: अयोध्याया: ________ आसीत्।

(क) राजान: (ख) राजा

(ग) राजानम् (घ) न कोऽपि

(*v*) ________ कुत्र गच्छत: ?

(क) भवती (ख) भवत्यौ

(ग) भवत्य: (घ) भवतीम्

(*vi*) गृहं ________ बालक: गीतं गायति।

(क) गच्छन्त: (ख) गच्छन्तौ

(ग) गच्छन् (घ) गच्छन्तम्

5- **मञ्जूषात: उचितं संख्यावाचकं पदं चित्वा वाक्यानि पूरयत–**

(*i*) वेदा: ________ सन्ति।

(*ii*) ________ अङ्गुलीषु तर्जनी एका भवति।

(*iii*) मनुष्यस्य ________ इन्द्रियाणि भवन्ति।

(*iv*) मञ्चे ________ गायिका गायति।

(*v*) ________ मासे त्रिंशत् दिवसा: भवन्ति।

(*vi*) सभायां ________ गायका: आसन्।

| मञ्जूषा |
|---|
| पञ्चसु, एका, चत्वार:, पञ्च, त्रय:, एकस्मिन् |

6- **प्रदत्तविकल्पेभ्य: उचितम् उत्तरम् चित्वा रिक्तस्थानानि पूरयत–**

(*i*) यूयम् भोजनं समये ________।

(क) भक्षयतु (ख) भक्षयत

(ग) भक्षयतम् (घ) भक्षय

(*ii*) ते मातृभूमिं ________।

(क) रक्षे: (ख) रक्षेत

(ग) रक्षेयम् (घ) रक्षेयु:

(*iii*) वयं सदा अध्यापकानाम् आज्ञापालनं ________।

(क) कुर्यात (ख) कुर्या:

(ग) कुर्याम (घ) करवाम

(*iv*) भक्तौ ईश्वरं ________।

(क) भजेताम् (ख) भजरेन्

(ग) भजेम (घ) भजेयु:

(*v*) सर्वे एव छात्रा: विद्यालये पुरस्कारान् ________।

(क) लभन्ताम् (ख) लभताम्

(ग) लभेन्ताम् (घ) लभस्व

(*vi*) भवन्त: गुरून् ________।

(क) सेवताम् (ख) सेवध्वम्

(ग) सेवन्ताम् (घ) सेवस्व

7 –

. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–

(i) त्वं ________ मा प्रमदः।

(क) विद्यया (ख) विद्यायै

(ग) विद्याम् (घ) विद्यायाः

(ii) ________ अनन्तरं सा गृहं गमिष्यति।

(क) पठनात् (ख) पठनेन

(ग) पठनस्य (घ) पठनम्

(iii) ________ हीनः नरः न शोभते।

(क) विद्या (ख) विद्याम्

(ग) विद्यया (घ) विद्यायै

(iv) स ________ समया उद्याने गन्तुम् इच्छति।

(क) गृहे (ख) गृहस्य

(ग) गृहाय (घ) गृहम्

(v) एतानि फलानि ________ अलम्।

(क) बालकानाम् (ख) बालके

(ग) बालकेभ्यः (घ) बालकम्

(vi) ________ न विश्वसितव्यम्।

(क) दुष्टम् (ख) दुष्टे

(ग) दुष्टाय (घ) दुष्टात्

8 –

प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।

(i) छायाकारेण पुरस्कारः ________।

(क) प्राप्तः (ख) प्राप्तम्

(ग) प्राप्ता (घ) प्राप्त्वा

(ii) बालकाः प्रश्नं ________।

(क) पृष्टवान् (ख) पृष्टवन्तौ

(ग) पृष्टवन्तः (घ) पृष्टवत्

(iii) ________ यानं ध्वनिं करोति।

(क) गच्छन्ती (क) गच्छता

(ग) गच्छत् (घ) गच्छन्

(iv) छात्राः ________।

(क) हसितवान् (ख) हसिवन्तौ

(ग) हसितवन्तः (घ) हसितवती

(v) पुरस्कारं ________ पण्डितान् दृष्ट्वा तत्र करतलध्वनिः जातः।

(क) लभमानः (ख) लभमानान्

(ग) लभतः (घ) लभ्यमानम्

(vi) इतस्ततः________ सः परिश्रान्तः।

(क) भ्रमन्त्यः (ख) भ्रमन्

(ग) भ्रमता (घ) भ्रमत